# भारविः

## भारवेः परिचय

कौशिकगोत्रोत्पन्नस्य नारायणस्वामिनः पुत्रो भारविः। भारवेः पूर्वजा पूर्वम् उत्तरपश्चिमभारतान्तर्गतम् आनन्दपुरं नाम नगरमध्यवात्सुः, परतश्च ते नासिकनामकं दक्षिणभारतनगरमायाताः। एकदा स्वसमसामयिकेन राजकुमारेण विष्णुवर्धनेन समं मृगयायां घोरं काननमुपेतो भारविः मांसं सिषेवे, यत्पापानोदनाय स तीर्थानि बभ्राम। तदीयं काव्यं श्रुत्वा काञ्चीनृपः सिंह विष्णुस्तमात्मराजधानीमानाययत्। सिंहविष्णुतनयेन राजकुमारमहेन्द्रविक्रमेण स तत्र सानन्दमुवास। तस्य पुत्रो मनोरथनामाऽऽसीत्। तस्य प्रपौत्रः दण्डी बभूव। इयं कथाऽवन्तिसुन्दरीकथायां लिखिता। भारवेरेव नामान्तरं दामोद इत्यथवा दामोदरभारवो भिन्नौ पुरुषावितिसन्देहो दुरपासः।

भारविः शैव आसीत्। भारविरिति नाम एल्होल् शिलालेखे ( Ailhol inscription ) निम्नलिखितरूपेण प्राप्यते—

'येनायोजि न वेश्म स्थिरमर्थविधौ विवेकिना जिनवेश्म।
स विजयतां रविकीर्त्तिः कविताश्रितकालिदासभारविकीर्तिः॥'

अयं पुलकेशिनो द्वितीयस्य ६३४ ई० सामयिकः शिलालेखः, अतो भारवि स्तत्पूर्वतनः सम्भवति।

किञ्च काशिकावृत्तौ भारवेः काव्यमुदाहृतं दृश्यते।

अपि च हर्षचरिते बाणेन भारविनामास्मरणात् बाणसमयपर्यन्तं भारवेः प्रसिद्धिरजायतेति तर्कयितुं शक्यते।

अतः भारवेः समयः षष्ठेशवीयशतकं मन्तुं युज्यते।

## भारवेः किरातार्जुनीयम्

शिवार्जुनयुद्धमवलम्ब्य निर्मितं भारवेरेकमेव किरातार्जुनीयाभिधं का प्राप्यते। अष्टादशसर्गनिबद्धेऽत्र महाकाव्ये महाभारताधारकं सुन्दरमुपाख्या चित्रितम्।

द्यूते पराजितो युधिष्ठिरो भ्रातृभिः पत्न्या च सह द्वैतवने वसति स्म। दुर्योधनस्य शासनपद्धतिं ज्ञातुमेकं वनेचरं गुप्तचररूपेण प्रेषितवान्। सर्वं ज्ञा प्रतिनिवृत्तो वनेचरो दुर्योधनस्य नीतिपूर्णां शासनपद्धतिं युधिष्ठिराय निवेद मास। भीमद्रौपद्यौ युधिष्ठिरं बहूत्तेजयामासतुः परं प्रतिज्ञामुल्लङ्घ्य युधि

युद्धार्थं न प्रावर्त्तत। अत्रान्तरे वेदव्यासस्तत्रायातः। स पाशुपतास्त्रमासादयितुमर्जुनं तपस्यार्थमिन्द्रकीलं नाम पर्वतं प्रेषयामास। तपस्यतोऽर्जुनस्य व्रतभङ्गाय देवबाला आगत्य विफलप्रयासा अभवन्। इन्द्रः स्वयं तदाश्रममागत्य तं प्रोत्साहयामास। अर्जुनस्य तपोबलं परीक्षितुं शिवः किरातवेषमाधायागतः। मायावी शूकरोऽर्जुनस्याश्रमपार्श्वेऽदृश्यत। अर्जुनकिरातौ सहैव तत्र शूकरे बाणं प्रचिक्षिपतुः। इदमेव युद्धकारणमजायत। युद्धयमानयोः किरातार्जुनयोर्गाण्डीवी भुजाभ्यामाजघ्ने कनकशिलानिभं विषमविलोचनस्य वक्षः। अर्जुनपराक्रमदर्शनतुष्टः शिवोऽर्जुनाय पाशुपतास्त्रं ददौ।

## भारवेःकाव्यशैली

भारवेरर्थगौरवं प्रसिद्धम्। अतएव मल्लिनाथोऽपि टीकाप्रारम्भे—नारिकेलफलसम्मितं वचो भारवेरित्याह। बहोरप्यर्थराशेरल्पेन शब्देनाभिधाने भारविरभ्यस्तकौशल इति सर्वेषां विदुषां विचारः। भीमभाषणस्य प्रशंसायां युधिष्ठिरेण प्रोक्तम्—

'स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहतं क्वचित् ॥'

वस्तुत इयमेवोक्तिर्भारविकवित्वप्रशसायायप्युपयुज्यते।

ऋतूनां जलक्रीडायाश्चन्द्रोदयस्य च वर्णने महती कवित्वप्रतिभा प्रदर्शिता भारविणा। अलङ्काराणां यथावसरोपन्यासे चित्रकाव्यनिर्माणे च परं साफल्यामासादितमनेन कविवरेण। भारविणा नीतयो निपुणमुपन्यस्ताः—

'वरं विरोधोऽपि समं महात्मभिः।'
'न वञ्चनीयाः प्रभवोऽनुजीविभिः।'
'हितं मनोहारि च दुर्लभं वचः।'
'विश्वासयत्याशु सतां हि योगः।'
'सुदुर्लभाः सर्वमनोरमा गिरः।'
'गुरुतां नयन्ति हि गुणा न संहतिः।'
'गुणाः प्रियत्वेऽधिकृता न संस्तवः।'

'षाड्गुण्यप्रभवा नीतिर्वंशस्थेन विराजते' इति क्षेमेन्द्रोक्तिर्वंशस्थोपनिबद्धां भारवेर्नीतिचर्चामालोक्यैव प्रवृत्ता स्यादिति सम्भाव्यते।

भारवेः कवितानां समीक्षया ज्ञायते तदस्याभिमानधनताऽऽसीत्। भारविकवितायां तर्कात्मकमोजः प्रबलम्। कवित्वनिदर्शनाय कतिचन पद्यान्युद्ध्रियन्ते।

'अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम्।
विहाय लक्ष्मीपतिलक्ष्मकार्मुकं जटाधरः सञ्जुहुधीह पावकम् ॥'

Scanned with CamScanner